**CLASS : 10th (Secondary)** **Code No. 136**

**Series : Sec/Annual-2023**

*रोल नं०* | | | | | | | | | | |

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (आर्ष पद्धति गुरुकुल)

**Sub. Code : 1001/SKS**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देश - सर्वे प्रश्नाः समाधेयाः।***

**खण्डः 'क'**

**(बहुविकल्पीयाः प्रश्नाः)**

**1.** अधोविन्यस्तानामेकं समीचीनमुत्तरं विचित्य लिखत – 1 × 16 = 16

(i) यजुर्वेदः कस्य हृदि प्रकटीभूतः ?

(क) अग्नि-महर्षेः (ख) वायु-महर्षेः

(ग) आदित्य-महर्षेः (घ) अङ्गिरा-महर्षेः

(ii) ''बर्हिर्षि'' पदस्य कोऽर्थः खलु ?

(क) मानसे (ख) कुशासने

(ग) बाह्यदेशे (घ) ब्रह्माण्डे

(iii) ''नाभ्याऽआसीदन्तरिक्षम्'' इति मन्त्रे कः स्वरः ?

(क) षड्जः (ख) ऋषभः

(ग) गान्धारः (घ) मध्यमः

(iv) द्वात्रिंशाध्याये कियन्तो मन्त्राः ?

(क) द्वादश (ख) चतुर्दश

(ग) पञ्चदश (घ) षोडश

(v) ''दृष्ट्वा'' इति पदे कः प्रत्ययः ?

(क) त्वा (ख) ट्वा

(ग) क्त्वा (घ) वा

(vi) ''श्रेयः'' इति पदं कस्मिन् लिङ्गे ?

(क) पुंसि (ख) नपुंसके

(ग) स्त्रियाम् (घ) पुंसि क्लीबे च

(vii) ''गुडाकेशः'' इत्यनेन कः सम्बोध्यते ?

(क) सञ्जयः (ख) द्रोणः

(ग) अजुर्नः (घ) श्रीकृष्णः

(viii) वैदिकगीतायाः तृतीयाध्यायस्य नाम किम् ?

(क) ज्ञान-योगः (ख) सन्न्यासयोगः

(ग) भक्तियोगः (घ) कर्मयोगः

(ix) ''हतो वा प्राप्स्यसि ........... जित्वा वा भोक्ष्यसे महीम्।'' रिक्तस्थानं पूरयत।

(क) सुखम् (ख) स्वर्गम्

(ग) यशः (घ) दुःखम्

(x) मित्रसम्प्राप्तितन्त्रे नीतिसन्धिः कतिविधः ?

(क) त्रिधा (ख) सप्तधा

(ग) चतुर्धा (घ) पञ्चधा

(xi) ''नातिदूरस्थः'' इति पदं कस्मिन्नर्थे ?

(क) दूरस्थितः (ख) अतिदूरस्थः

(ग) किञ्चिद् दूरस्थः (घ) समीपस्थः

(xii) ''विहङ्गमः'' इत्यस्य पर्यायपदं किं नास्ति ?

(क) विहगः (ख) विहंगः

(ग) विहायस् (घ) खगः

(xiii) सन्न्यासग्रहणे कस्य योग्यता अपेक्षते ?

(क) ब्राह्मणस्य (ख) वैश्यस्य

(ग) क्षत्रियस्य (घ) सर्वेषामेव

(xiv) वानप्रस्थी कुत्र वसेत् ?

(क) आश्रमे (ख) अरण्ये

(ग) गृहे (घ) गुरुकुले

(xv) ''नमः'' योगे का विभक्तिर्भवति ?

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

(xvi) ''............ निकषा नदी।'' रिक्तस्थानं पूरयत।

(क) ग्रामस्य (ख) ग्रामेण

(ग) ग्रामम् (घ) ग्रामे

**खण्डः 'ख'**

**(अतिलघूत्तरीय प्रश्नाः)**

**2.** अधस्तनानां गद्यभागानां हिन्दीभाषयार्थो विधीयताम् — 2 × 4 = 8

(क) तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म। कदाचित् प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितो यावत्पश्यति, तावज्जालहस्तोऽतिकृष्णतनुः, स्फुटितचरणः नरः संमुखो बभूव।

(ख) वायस आह — ''पृष्टो मया तत्रैव, परमनेन अभिहितं यद् — बहु वक्तव्यमस्ति, तत्तत्रैव गत्वा कथयिष्यामि इति ममापि न निवेदितम्''।

(ग) मन्थरक आह — ''भद्र ! भवति सुहृदयमसन्दिग्धं, यत् क्षुत्क्षामोऽपि शत्रुभूतं त्वां भक्ष्यस्थाने स्थितमेवं पृष्ठमारोप्य आनयति, न मार्गेऽपि भक्षयति''।

(घ) ततश्च वाष्पावसाने चित्राङ्गो लघुपतनकमाह — ''भो मित्र ! सञ्जातोऽयं तावन्मम मृत्युः। तद्युक्तं सम्पन्नं यद्भवता सह मे दर्शनं सञ्जातम्''।

**3.** निम्नलिखितानां गद्यांशानां पद्यानां वा हिन्द्यामर्थं कुरुत – 2 × 3 = 6

(क) वयं राज्ञे कदापि न क्रुध्यामः द्रुह्यामः, ईर्ष्यामः, असूयामो वा अपितु तस्मै चिरकुशलं हितं सुखमायुष्यञ्च प्रार्थयेमहि।

(ख) शोकरातिभयत्राणं प्रीतिविश्वासभाजनम्।

केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।।

(ग) अथान्येद्युः मृगा एकत्र मिलित्वा अचिन्तयन् –

हा ! कष्टम्। भासुरकस्य भयात् आवासाद् बहिर्गन्तुं

न शक्नुमः, भोजनं विना म्रियेमहि।

**4.** अधोलिखितानां मन्त्रपूर्तिं विधेहि — $2 \times 3 = 6$

(क) सर्वे निमेषा ............. ।

(ख) परि द्यावापृथिवी ............. ।

(ग) यत्पुरुषं व्यदधुः ............. ।

**खण्डः 'ग'**

**(लघूत्तरीय प्रश्नाः)**

**5.** निम्नाङ्कितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत — $4 \times 3 = 12$

(क) अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।

पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्।

(ख) अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।

विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हसि।।

(ग) सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।

**6.** अधस्तनं प्रश्नद्वयमपि समाधीयताम् — $4 \times 2 = 8$

(क) पञ्चमे समुल्लासे सन्न्यासिनां के-के धर्माः वर्णिताः संक्षेपेण लिखत ?

(ख) सन्न्यासग्रहणं ब्राह्मणानामेव धर्मः आहोस्वित् क्षत्रियादीनामपि।

**खण्डः 'घ'**

**(निबन्धात्मक प्रश्नाः)**

**7.** मन्त्र***द्वयस्य*** दयानन्दभाष्यानुसारेण सप्रसङ्गं व्याख्यां कुरुत — $6 \times 2 = 12$

(क) ततो विराडजायत विराजोऽधि पुरुषः।

स जातोऽअत्यरिच्यत पश्चाद् भूमिमथो पुरः।।

**अथवा**

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।

योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

(ख) ब्राह्मणोऽस्य मुखमासीद बाहू राजन्यः कृतः।

ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत।।

**अथवा**

यां मेधां देवगणाः पितरश्चोपासते।

तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।।

**8.** वैदिकगीतायाः द्वितीयस्य ***अथवा*** तृतीयस्य अध्यायस्य सारं लिखत। $6 \times 1 = 6$

**9.** पञ्चतन्त्रानुसारं ''तिलचूर्णविक्रय'' – कथायाः ***अथवा*** ''वणिक्पुत्रं'' – कथायाः सारं संक्षेपेण लिख्यताम्।

$6 \times 1 = 6$